॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## जगन्नाथाष्टकम्

ॐ नमो भगवते वासुदेवाय

श्रीमद्भागवत रसिक कुटुंब

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# जगन्नाथाष्टकम्

## श्रीजगन्नाथाष्टकम् स्तोत्र

कदाचित्कालिन्दीतटविपिनसङ्गीतकरवो,
मुदा गोपीनारीवदनकमलास्वादमधुपः।
रमाशम्भुब्रह्मामरपतिगणेशार्चितपदो,
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 1 ॥

भुजे सव्ये वेणुं शिरसि शिखिपिंछं कटितटे,
दुकूलं नेत्रान्ते सहचरकटाक्षं विदधते ।
सदा श्रीमद्वृन्दावनवसतिलीलापरिचयो,
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 2 ॥

महाम्भोधेस्तीरे कनकरुचिरे नीलशिखरे,
वसन् प्रासादान्तस्सहजबलभद्रेण बलिना ।
सुभद्रामध्यस्थस्सकलसुरसेवावसरदो,
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 3॥

कृपापारावारास्सजलजलदश्रेणिरुचिरो,
रमावाणीसौमस्सुरदमलपद्मोद्भवमुखैः।
सुरेन्द्रैराराध्यः श्रुतिगणशिखागीतचरितो,
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 4 ॥

रथारूढो गच्छन् पथि मिलितभूदेवपटलैः,
स्तुतिप्रादुर्भावं प्रतिपद मुपाकर्ण्य सदयः ।
दयासिन्धुर्बन्धुस्सकलजगता सिन्धुसुतया,
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 5॥

परब्रह्मापीडः कुवलयदलोत्फुल्लनयनो,
निवासी नीलाद्रौ निहितचरणोऽनन्तशिरसि ।
रसानन्दो राधासरसवपुरालिङ्गनसखो,
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥6॥

न वै प्रार्थ्यं राज्यं न च कनकतां भोगविभवं,
न याचेऽहं रम्यां निखिलजनकाम्यां वरवधूम् ।
सदा काले काले प्रमथपतिना गीतचरितो,
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 7 ॥

हर त्वं संसारं द्रुततरमसारं सुरपते,
हर त्वं पापानां विततिमपरां यादवपते ।
अहो दीनानाथं निहितमचलं निश्चितपदं,
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 8॥

जगन्नाथाष्टकं पुन्यं यः पठेत् प्रयतः शुचिः ।
सर्वपाप विशुद्धात्मा विष्णुलोकं स गच्छति ॥

इति श्रीमद् शङ्कराचार्यविरचितं जगन्नाथाष्टकं सम्पूर्णं॥